| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ। चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| | द्विकुत्सितकर्म्म बलाभ्यासेकं कारितस्य निरग्निद्विजातेः प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | साग्नेश्चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | क्षत्त्रियवैश्ययोः पराकः। | ५ धेनवः। | १५ कार्षापणाः। | यथाशक्ति। |
| | शूद्रस्य मासार्द्धं यावकपानम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | वत्सरादूर्द्ध्वं वर्षचतुष्टयं यावत् भागह्रासेन प्रायश्चित्तमूहनीयम्। | | | |
| | तदूर्द्ध्वं तत्समत्वात् पतितत्वेन प्रायश्चित्तान्तराभावान्मरणम्। | | | |
| अनुदकमूत्रपुरीषकरणम्। | सचेलस्नानं गोस्पर्शश्च। | | | |
| | अभ्यासे एकोपवासः सचेलस्नानञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| जलाग्न्योरशुचिद्रव्यप्रक्षेपः। | मासं यावकपानम्। एतदभ्यासे। | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| | ज्ञानत ईषदार्त्तस्य त्रिरात्रोपवासः। इदमापः प्रवहत इति जपश्च। | ० | १॥० कार्षापणाः। | यथाशक्ति। |
| | अनार्त्तस्य कौतूहलादिना तप्तकृच्छ्रम्। | ४ धेनवः। | १२ कार्षापणाः। | यथाशक्ति। |
| अन्योन्याशुक्तद्वेषोत्पादनम्। अर्थाक्षेत्रच्छेदकरणम्। | अहोरात्रमनश्नन् भूत्वा पयःपानम्। | ० | ५ रजतमाषकाः। | धनुर्दण्डश्च। |
| शक्रधनुःपलाशाग्निदर्शकत्वम्। | इदं शक्रधनुरिति व्यपदिश्य कामतो दर्शयित्वाहोरात्रोपवासः। | ० | ३ रूप्यमाषकाः। | यथाशक्ति। |
| श्राद्धनिमन्त्रितब्राह्मणानाक्रानम्। | यतिचान्द्रायणम्। | ४ धेनवः। | ११।० कार्षापणाः। | यथाशक्ति। |
| देवागारक्षतिष्टकाकाष्ठशिलादिना गृहकरणम्। | प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| निष्ठीवनादि। आदिना वातकर्म्मदन्तश्लिष्टानृतच्युत्पतितसम्भाषणवासःपरिधानानि। | आचमनम्। गोपृष्ठस्पर्शः। अर्कदर्शनम्। दक्षिणश्रवणस्पर्शो वा। अत्र पूर्व्वाभावे ततः परम्। इन्द्रियप्रस्रवामेध्यस्य मुखस्पर्शे स्नानम्। | | | |
| यतीनां व्रतोपव्रतभङ्गः। व्रतानि यथा। अहिंसासत्यास्तेयमैथुनवर्ज्जनानि। उपव्रतानि यथा। अक्रोधगुरुशुश्रूषाप्रमादशौचाहारशुद्धीनि। | अहोरात्रोपवासपूर्व्वकचान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | रमणेच्छया स्त्रीसमीपगमने प्राणायामशतपूर्व्वकसान्तपनम्। | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| | असत्यादे उपवासः प्राणायामशतञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| | अकामतः पशुक्रिमिहिंसायां कृच्छ्रातिकृच्छ्रम्। | ६ धेनवः। | १८ कार्षापणाः। | यथाशक्ति। |
| | चान्द्रायणं वा। इन्द्रियदौर्बल्यात् स्त्रीदर्शनात् स्कन्दने षोड़शप्राणायामाः। स्त्रियं विना कामतो दिवास्कन्दने त्रिरात्रोपवासः प्राणायामशताचरणञ्च। रात्रौ स्कन्दने स्नानपूर्व्वकद्वादशप्राणायामाः। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | एकान्नमधुमांसामश्राद्धप्रत्यक्षलवणानामभोज्यानामेकैकस्य भोजने प्राजापत्यम्। योगिनां प्रमादे योगेन शुद्धिः। ज्ञानिनां ज्ञानमेव शुद्धिकारणम्। ब्रह्मचारिणोऽकामतः स्वप्ने रेतःस्खलने स्नानम्। अर्कार्च्चनम्। त्रिः पुनर्मामित्यृचो जपश्च। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |